## ॥ अथ सप्तषष्ठितमोऽध्यायः ॥ Chapter-67

मांधातोवाच :- श्रीमाले वैश्यजातीनां किं कुलं का च देवता ॥
कीदृशाश्रमवेदिप्र तन्मे कथय सुव्रत ॥ १

वसिष्ठ उवाच :- शृणु राजन् प्रवक्ष्यामि वैश्यानां कुलदेवता ॥
पुरा त्रेतायुगे राजन् हरिव्यासंज्ञको वणिक् ॥ २

कोशिक्यां गोत्रे चोत्पन्नो धनवान् श्रीनिकेतने ॥
वयसा जरठो जातः सन्तत्या हीन एव सः ॥ ३

पुत्रशोकेनदुःखार्तो न स्थितिं लभते सदा ॥
सत्वाराधयामास देवीं संतानहेतवे ॥ ४

गन्धपुष्पादिकमलै भक्तिभावेन संयुतः ॥
गतो वर्षास्त्रिमासाश्चपूजनेनतस्यतु नृप ॥ ५

एकदा दिवसे राजन् मध्यरात्रे विनिर्गते ॥
प्रत्यक्षाभूतमहालक्ष्मी-देवी च कमलाश्रया ॥ ६

कालेस्तोषिता राजन् परितुष्टा वरं ददौ ॥ ७

कमलोवाच :- वरंवरयभो पुत्र यत्ते मनसि वर्तते ॥
कमलेनकमलंस्तोषिताहं ते परितुष्टा ददामि वै ॥ ८

वैश्य उवाच :- यदि तुष्टासि हे मातर्वरमेकंच देहि मे ।
पुत्रोत्पत्तिर्न मे मातः सा च देया त्वयानघे ॥ ९

देव्युवाच :- पुत्रोत्पत्तिश्च वैश्यस्य भविष्यति निरंतरम् ॥
ताभ्यश्चनैकुलकुपदौ चतुष्टय्यांच विशेषतः ॥ १०

बलिदानेन संयुक्तां विवाह शुभ कार्ययोः ॥
मम पूजां करिष्यन्ति कुले वृद्धिर्भविष्यति ॥ ११

वैश्य उवाच :- मम कुले यहे-मातः सदा त्वं कुल देवता ॥
तवपूजां करिष्यामि विवाहशुभकार्ययोः ॥ १२

वशिष्ठ उवाच:- वैश्यायसुवरं दत्त्वा देवीरन्तर्दधौ नृप ॥
वैश्योपि हर्षमापन्नः पुत्रशोकान्निवर्तते ॥ १३

एवं कौशिकगोत्रे तु कमलाभूत् कुलदेवता ॥
शृणु राजन्प्रवक्ष्यामिकथां पौराणिकींशुभाम् ॥ १४

श्री

औपमन्यवकुले जातो वैश्यो नामा धनुर्धरः ।।
तस्य भार्या शुभा राजन्मृतवत्सा सदैव हि ।। १५

तस्याः पुत्रा न जीवन्ति सर्पदष्टा मृताः पुनः ।।
पंचवर्षजीवन् बालः सर्पदष्टो मृतो नृप ।। १६

धनुर्धरसुताः सर्वे सर्पदष्टा मृता बहु ।।
धानुर्धरा तदा भार्या पुत्रशोकेन विव्हला ।। १७

देहेन च कृशा जाता एवं चिन्तयते[१९] हृदि ।।
किं करोमि क्व गच्छामि कस्य वा कथयाम्यहम् ।। १८

पूर्वजन्मकृतं किं मे सर्पदंशो सुतेर्ध्रुवं ।
रक्षको मम पुत्राणां त्रिलोकेषु न दृश्यते ।। १९

पुत्रं विना गतिर्नास्तिकुलच्छेदो भवेत् मम ।।
नाथोपि जर्जरीभूतो वयसा भवति मम ।। २०

पुत्रोत्पादनकार्यन्तु करिष्यामि निरन्तरम् ।
नागिन्याः कुलदेव्या वै राधनं च करिष्यती ।। २१

-0-

१९ चिन्तयन्ति

नागिनी च श्रिया: सर्वत्र प्रसिद्धा पुत्रदायिनी ॥
देवीं बिना पुत्र पालौ नैव पश्यामि कुत्रचित् ॥ २२

वसिष्ठ उवाच: एवं चिन्तयन्ती राजन् या च भार्या धनुर्धरा ॥
नागिन्या यत्र स्थानंव सा तु तत्रैव गच्छति ॥ २३

तत्र गत्वा नृपश्रेष्ठ पूजयामास नागिनीम् ॥
निराहारा यतात्मा तु देवीपूजनतत्परा ॥ २४

पुष्पैर्धूपैश्च नैवेद्यै: पुत्रकामेन पूजिता ॥
एवं गते मासाकैंके प्रत्यक्षाभू ज्जनेश्वरी ॥ २५

देव्युवाच :- वरं वरय कल्याणि यत्ते मनसि वर्तते ॥
अहं तुष्टा प्रदास्यामि तवेप्सितंवरं स्थिरम् ॥ २६

राज्ञ्युवाच :- यदि तुष्टा महादेवि वरमेकं ददासि मे ।
बहुपुत्रामृता मात: सर्पेण दंशिता मम ॥ २७

पूर्वजन्मनि भो मात: किं कृतं दुष्कृतं मया ॥ [१ए]
येन पुत्रा न जीवन्ति रक्षां कुरु सुतं मम ॥ २८

-०-

१ ए पुत्र

देव्युवाच :- पूर्वजन्मनि मां पुत्रि गर्हितं च त्वया कृतम् ।।
त्वया ते प्रेरितो भर्ता सर्पबाला न्यवधीत् ।। २६

स सर्प इह हन्ति ते पुत्रं जातं शुभानने ।।
कुरु तस्मात्व्रतं पुत्रि सर्पसंतुष्टिकारणम् ।। ३०

श्रावणीकृष्णपक्षे च कुरु त्वं नागपूजनम् ।।
विवाहेपितृकार्ये च कुरु त्वं नाग पूजनम् ।। ३१

तेन पुत्र-स्तवाशु च जीवति कुलवर्धक: ।। ३२

शुभोवाच :- एवमस्तु च मां देवि करिष्यन्ति कुले मम ।।
मम कुले च मामात: सदा त्वं कुलऽदैवता ।। ३३

नागोपि कुलदेवश्च पूजयिष्ये निरन्तरम् ।।
धन्याहमिह संसारे त्वया दत्तो हि मे सुत: ।। ३४ [१ ए]

वशिष्ठ उवाच :- एवमुक्त्वा तदा देवी अन्तर्धानपरामवत् ।।
शुभापि प्राघित: पुत्रो विवर्ध: कुलवंशक: ।। ३५ [२ ए]

-०-

१ ए धन्येहमिह

२ ए शुभोऽपि

एवं भवेत्तदा राजन् नागिनी कुलदेवता ॥
पुन: शृणु प्रवक्ष्यामि वत्सर्षि[1] कुलदेवता ॥ ३६

देवीदासो हि वैश्यश्च त्रेतायां संबभूवतु: ॥
तस्य पुत्र: सुनन्दश्च देवभक्तिपरायण: ॥ ३७

एकदा दिवसे राजन् गतो से देवदर्शने ॥
प्रवृता रजनी राजन् आगत: पुण्यवर्त्मनि ॥ ३८

एतस्मिन्नन्तरे दृष्टो राक्षसो भीमदर्शन: ॥
कम्पितश्च सुनन्दश्च राक्षसोपि तदाग्रहीत् ॥ ३९

रुदन्तं विह्वलै: शब्दैर्मातिस्तात इति बहु ॥
एतस्मिन् व्योममार्गे तु बालागौरी समागता ॥ ४०

रुदन्तं बालकं दृष्ट्वाथ संगृह्य राक्षसात्तदा ॥
राक्षसं हन्ति सा देवी बालकं स्वकरे धृतम् ॥ ४१
आश्वास्य सा तु तं बालं कथयामास प्रेमत: ॥ ४२

-०-

१ ए वत्स्ऋषि

देव्युवाच :- मा भैषीस्त्वं च भोबाल माताहं च तथा सुत ॥
बालागौरीति मन्नाम्ना वसन्ती श्रीनिकेतने ॥ ४३

आगता तव भाग्येन काकतालीयवत्सुत ॥
सखीभिः प्रेषिता सधे गच्छ बाल तव गृहम् ॥ ४४

सुनन्दउवाच :- न गच्छामि च हेमातर्बलिभोग्यत्वया विना ॥
प्रेषिता मातरागच्छ सखीभिर्मामिकं गृहम् ॥ ४५

कथयस्व च पित्रे मे सर्ववृत्तान्तमीदृशम्[1] ॥
बलिं गृह्य गच्छ देवि मयि संतुष्टिहेतवे ॥ ४६

वसिष्ठ उवाच :- देव्या च प्रेरिता राजन् सखी गत्वा गृहं तदा ॥
सौनन्दं सर्ववृत्तान्तं देवीदासे निवेदयत् ॥ ४७

तच्छ्रुत्वा देवी दासोपि बन्धुमित्रसंयुतः ॥
बलिदानं चकाराशु देवीतुष्ट्यर्थं[2] हेतवे ॥ ४८

मृदंगतालनादेन चकार चोत्सवं बहु ॥
लुठन् अवनीपीठे तु ननाम देवीसंनिधौ ॥ ४९

-०-

१ ए सर्ववृत्तान्तमीदृशम् ॥
२ ए तुष्ट्यर्थं.

देवीदास उवाच :-त्वं मातर्जननी देवि त्वया दत्तो हि पुत्रकः ।।
राजसमर्पितं पुत्रं त्वां विना को हि रक्षति ।। ५०

देव्युवाच :- वरं वरय मो पुत्र यो मनसि वर्तते ।।
तुष्टाहं बलिदानेन ददामीति न संशयः ।। ५१

देवीदास उवाच:- यदि तुष्टासि मोदेवि मम कुले रक्षका भव ।।
कुलदैवतरूपेण तव पूजां शुभादिशु ।। ५२

वंश्या मे च करिष्यन्ति सर्वत्र सुखभागिनः ।। ५३

वसिष्ठउवाच :- एवमस्तु वणिक्श्रेष्ठ देवी चान्तर्दधौ नृप ।।
अन्वितौ वैश्यदेव्या च हर्षयुक्तो गमत् गृहम् ।। ५४
इदं कुलादिमाहात्म्यं कथितं ते मयानघ ।। ५५

-०-

इति श्री स्कंद पुराणे एकाशीति साहस्र्यां संहितायां तृतीय परच्छेद ब्राह्मविभागे श्रीमाल माहात्म्ये कुल माहात्म्यं नाम सप्तषष्ठितमोऽध्यायः ।।

------